पुनरावर्तनम् – सन्धिः, संहिता, सन्धिकार्यम्, इको यणचि, अनचि च, स्थानिवद्भावः

४९. स्थानिवदादेशोऽनल्विधौ (१.१.५६) – त्रीणि पदानि । स्थानिवद्, आदेशः, अनल्विधौ ।

आदेशः स्थानिवत्स्यात्, न तु स्थान्यलाश्रयविधौ ।

राम ङे

राम य ('ङेर्यः' इति सूत्रेण य-आदेशः)

'सुपि च' इति दीर्घः कर्तव्यः । किन्तु 'य' इत्यस्य सुप्त्वं नास्ति ।

तदा आदेशः = यादेशः, स्थानिवत्=ङेवत् स्यात् इत्यनेन तस्यापि सुप्त्वे रामाय ।

दिव् स्

दि औ स् ('दिव औत्' इति सूत्रेण औकारादेशः)

औकारस्य स्थानिवद्भावेन वकारत्वे 'हल्-ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सुप्रत्ययस्य लोपः प्राप्नोति ।

अत एव 'स्थानिवदादेशः अनल्विधौ' इत्युक्तम् । यत्र स्थानी 'अल्' (=एकः वर्णः) भवति, तमाश्रित्य च कार्यं कर्तव्यम्, तत्र स्थानिवद्भावो न ।

अत्र स्थानी=वकारः, स च अल्, तं वकारमाश्रित्य सुलोपः करणीयः । तस्मादत्र स्थानिवद्भावो नास्ति । सुलोपो न भवति ।

सुधी उपास्यः

सुध्य् उपास्यः

अत्र ईकारः स्थानी । यकारः आदेशः । आदेशः स्थानिवत्स्यात्, अर्थात्, यकारः इकारवत् स्यात्, इत्युक्ते ईकारस्य अच्त्वं यकारेऽपि भवति । यदि यकारे अच्त्वम् अतिदिश्यते, तर्हि 'अनचि च' इति द्वित्वं न भवति ।

सुध्य् उपास्यः

स् उ ध् य् उ पास्यः

अच् यर् न अच् अच्

'अनल्विधौ' एव स्थानिवद्भावः । अत्र स्थानी = ईकारः, स च अल् । तम् ईकारम् आश्रित्य द्वित्वनिषेधः कार्यः । तस्मादत्र स्थानिवद्भावः नास्ति । द्वित्वं भवति ।

अनेन इह यकारस्य स्थानिवद्भावेन अच्त्वम् आश्रित्य 'अनचि' इति द्वित्वनिषेधो न शङ्क्यः, 'अनल्विधौ' इति तन्निषेधात् ।

गण संख्याने

गण णिच्

गण् इ ('अतो लोपः' इति अकारस्य लोपः)

अत्र 'अत उपधायाः' इति वृद्धिः प्राप्नोति । वृद्धौ सत्यां 'गाणयति' इति रूपं प्राप्नोति, इष्यते च 'गणयति' इत्येव ।

स्थानिवद्भावेन वृद्धिः निवारयितुं शक्या । आदेशः = अकारलोपः, स्थानिवत् = अकारवत् स्यात् । यदि अकारः अस्ति, तर्हि णकारः उपधा । गकारोत्तर-अकारस्य अनुपधत्वात् वृद्धिः न भवति ।

किन्तु, अयम् अल्विधिः । स्थानी = अकारः, स च अल् । तम् अकारम् आश्रित्य वृद्धिनिषेधः कर्तुमिष्यते । सः अल्विधिः । 'अनल्विधौ' इत्युक्तत्वात् स्थानिवद्भावो न भवति।

ईदृशेषु स्थलेषु अल्विधावपि स्थानिवद्भावः इष्यते ।

५०. अचः परस्मिन् पूर्वविधौ (१.१.५७) – पदत्रयम् । 'स्थानिवद् आदेशः' इत्यनुवर्तते । अल्विध्यर्थमिदम् । परनिमित्तः अजादेशः स्थानिवत् स्यात्, स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये ।

त्रयः नियमाः

1. अचः आदेशः
2. परनिमित्तः
3. स्थानिभूतादचः पूर्वस्य कार्यम्

गणयति –

१. अचः = अकारस्य आदेशः = लोपः

२. परनिमित्तः = आर्धधातुकप्रत्ययनिमित्तः

३. स्थानिभूतः अच् = णकारोत्तर-अकारः, तस्मात् पूर्वस्य = गकारोत्तर-अकारस्य कार्यं = वृद्धिः करणीया ।

तस्मादत्र 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिद्भावः भवति । स्थानिवद्भावेन अकारस्य सत्त्वात् पूर्वस्य अकारस्य उपधत्वाभावात् वृद्धिः न ।

सुध्य् उपास्यः

१. अचः = ईकारस्य आदेशः

२. परनिमित्तः = 'अचि' इति उक्तत्वात् उकारनिमित्तः

३. स्थानिभूतः अच् = ईकारः, तस्मात् पूर्वस्य = धकारस्य कार्यं = द्वित्वं क्रियते ।

तेन, अत्रापि स्थानिवद्भावे, यकारस्य अच्त्वे 'अनचि' इत्युक्तत्वात् द्वित्वं न स्यात् ।

इति यणः स्थानिवद्भावे प्राप्ते

५१. न पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्ण-अनुस्वार-दीर्घ-जश्-चर्-विधिषु (१.१.५८) –

पदद्वयम् । 'स्थानिवदादेशः' इति, 'अचः परस्मिन्' इति च अनुवर्तते ।

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तः अजादेशः न स्थानिवत् ।

इति स्थानिवद्भावनिषेधः ।

सुधी + उपास्यः

सुध्य् उपास्यः ('इको यणचि' इति यणादेशः)

सुध् ध् य् उपास्यः ('अनचि च' इति द्वित्वम्)

५२. झलां जश् झशि (८.४.५३) – पदत्रयम् ।

झलाम् – षष्ठी = झल् वर्णानां स्थाने (षष्ठी स्थानेयोगा)

जश् – प्रथमा = विधेयः = जश् स्यात्

झशि – सप्तमी = झश्-वर्णे परे (तस्मिन्निति निर्दिष्टे पूर्वस्य)

स्पष्टम् ।

झलां स्थाने जश् स्यात् झशि परे ।

सु ध् ध् य् उपास्यः

झल् झश्

जश्

स्थानी – ध्

आदेशाः – जश् = ज्, ब्, ग्, ड्, द्

स्थानेऽन्तरतमः

धकारस्य स्थानम् – दन्ताः

ज् – तालु, ब् – ओष्ठौ, ग् – कण्ठः, ड् – मूर्धा, द् – दन्ताः

सु द् ध् य् उपास्यः

इति धकारस्य दकारः ।

५३. अदर्शनं लोपः (१.१.६०) – पदद्वयम् । 'स्थानेऽन्तरतमः' इत्यतः स्थाने इति अनुवर्तते।

प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात् ।

५४. संयोगान्तस्य लोपः (८.२.२३) – पदद्वयम् ।'पदस्य' इत्यधिकारः ।

संयोगान्तं यत् पदं तदन्तस्य लोपः स्यात् ।

सुधी उपास्यः

पदम्

सु द् ध् य् उपास्यः

संयोगः

इति यलोपे प्राप्ते

यणः प्रतिषेधो वाच्यः (वा) ।

यणः संयोगान्तलोपप्रतिषेधो वक्तव्यः ।

यणो मयो द्वे वाच्ये (वा)

यणः – पञ्चमी = यणः परस्य (तस्मादित्युत्तरस्य)

मयः – षष्ठी = मयः स्थाने (षष्ठी स्थानेयोगा)

द्वे – प्रथमा = विधेयः = द्वे स्तः ।

यण् + मय् = द्वित्वम्

यणः – षष्ठी = यणः स्थाने (षष्ठी स्थानेयोगा)

मयः – पञ्चमी = मयः परस्य (तस्मादित्युत्तरस्य)

द्वे – प्रथमा = विधेयः = द्वे स्तः ।

मय्+यण् = द्वित्वम्

सुद्   ध्   य्   उपास्यः

मय्   यण्

सुद्   ध्   य् य्   उपास्यः

सुद्ध्य्युपास्यः

मय इति पञ्चमी यण इति षष्ठी इति पक्षे यकारस्यापि द्वित्वम् ।

तदिह धकारयकारयोः द्वित्वविकल्पात् चत्वारि रूपाणि ।

१. एकधम् एकयम्

२. द्विधं द्वियम्

३. द्विधम् एकयम्

४. एकधं द्वियम्

सुधी + उपास्यः

सुध्य् उपास्यः ('इको यणचि' इति यणादेशः)

सुध् ध् य् उपास्यः ('अनचि च' इति धकारस्य द्वित्वम्) – Optional 1

सुद् ध् य् उपास्यः ('झलां जश् झशि' इति जश्त्वम्)

सुद् ध् य् य् उपास्यः ('यणो मयो द्वे वाच्ये' इति यकारस्य द्वित्वम्) – Optional 2

सुद्ध्य्युपास्यः (द्विधं द्वियम् - २)

यकारस्य द्वित्वाभावे (in absence of Optional sutra 2)

सुधी + उपास्यः

सुध्य् उपास्यः ('इको यणचि' इति यणादेशः)

सुध् ध् य् उपास्यः ('अनचि च' इति धकारस्य द्वित्वम्) – Optional 1

सुद् ध् य् उपास्यः ('झलां जश् झशि' इति जश्त्वम्)

सुद्ध्युपास्यः (द्विधम् एकयम् - ३)

धकारस्य द्वित्वाभावे (in absence of Optional sutra 1)

सुधी + उपास्यः

सुध्य् उपास्यः ('इको यणचि' इति यणादेशः)

सु ध् य् य् उपास्यः ('यणो मयो द्वे वाच्ये' इति यकारस्य द्वित्वम्) – Optional 2

सुध्य्युपास्यः (एकधं द्वियम् - ४)

उभयोः द्वित्वाभावे (in absence of both optionals)

सुधी+उपास्यः

सुध्य् उपास्यः ('इको यणचि' इति यणादेशः)

सुध्युपास्यः (एकधम् एकयम् - १)

मधु+अरिः, धातृ+अंशः, ऌ+आकृतिः